संस्कृतवार्ताः

19/01/2025

सायम्  - 06:20

<u>मुख्यवार्ताः</u>

· प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् भारतं प्रखर वैज्ञानिकानां नवोन्मेषवैज्ञानिकानां च साहाय्येन अन्तरिक्षप्रौद्योगिक्याः क्षेत्रे नूतन-मापदण्डान् स्थापयत।

· श्री मोदी  बाबा साहेब अम्बेडकरं डॉ. राजेन्द्र-प्रसादं, डॉ. श्यामा प्रसाद मुखर्जिनम् च समेत्य संविधान सभाया: सर्वेभ्यः जनेभ्यः नमनं कृतवान्। एतेषां नेतृणां विचारेभ्यः  जनाः प्रेरणाम् गृह्णन्तु इति सः उक्तवान् ।

· इजरायल-फिलीस्तीन-देशयोः सशस्त्रसमूहस्य हमासस्य च मध्ये युद्धविरामचर्चायाः प्रथमचरणस्य आरम्भः निर्धारितसमयात् त्रिहोरायाः  विलम्बेन जात: ।

· भारतीय  ॠतुविज्ञान विभागेन पश्चवर्ती विक्षोभ कारणात्  अग्रिमेषु  पञ्च दिवसेषु  जम्मू-कश्मीर, हिमाचल प्रदेश उत्तराखंड चेत्येषु राज्येषु अतिवृष्टेः हिमपातस्य च संचेतना प्रसारिता ।

· अण्डर-19 इति महिलानां विंशतिः प्रति विंशतिः क्रिकेट्-क्रीडायां भारतेन अद्य मलेशियादेशस्य कुआलालम्पुरे वेस्ट्-इण्डीज-दलं नव-स्तोभैः पराजितम्।

<u>मन की बात</u>

प्रधानमन्त्री नरेन्द्रमोदी अवदत्  यत् भारतं प्रखर वैज्ञानिकानां नवोन्मेषवैज्ञानिकानां च साहाय्येन अन्तरिक्षप्रौद्योगिक्याः क्षेत्रे नूतन-मापदण्डान् स्थापयत।  येन भावि-समाह्वानानां समाधानं उपलब्धो भविष्यति। अद्य आकाशवाण्याः  मन की बात कार्यक्रमस्य अष्टादशोत्तरैकशत-तमे अङ्के सः अन्तरिक्षक्षेत्रे  प्राप्तानां उपलब्धीनां प्रशंसाम् अकरोत्।

श्री मोदी  बेङ्गलूरु-नगरस्य अन्तरिक्ष-क्षेत्रस्य पिक्सेल इत्याख्यायाः स्टार्टअप इति -संस्थायाः प्रशंसां कृतवान्, अनया देशस्य प्रथमः निजी उपग्रहः पुञ्ज-फायरफ्लाई इति सफलतया

प्रक्षेपितम्। प्रधानमन्त्रिणा उक्तं यत् एतत् साफल्यं आत्मनिर्भरतायाः महत्त्वपूर्णं सोपानम् अस्ति। प्रधानमन्त्री पञ्चसप्ततितमं गणतन्त्रदिवसमालक्ष्य देशवासिभ्यः अग्रिम-शुभकामनाः प्रदत्तवान्। सः उक्तवान् यत् अस्मिन् वर्षे गणतन्त्रदिवसस्य विशेषं महत्त्वं वर्तते यतोहि अस्माकं संविधानस्य कार्यान्वयनस्य पञ्चसप्तति- वर्षाणि पूरितानि सन्ति। श्री मोदी बाबा साहेब अम्बेडकरं डॉ. राजेन्द्र-प्रसादं, डॉ. श्यामा प्रसाद मुखर्जिनम् च समेत्य संविधान सभाया: सर्वेभ्यः जनेभ्यः नमनं कृतवान्। एतेषां नेतृणां विचारेभ्यः जनाः प्रेरणाम् गृह्णन्तु इति सः उक्तवान् ।

प्रधानमन्त्रिणा जनवरी मासस्य पञ्चविंशति दिनाङ्के आयोक्ष्यमाणस्य राष्ट्रियमतदातृ-दिवसस्य महत्त्व-विषये अपि चर्चा कृता । अस्मिन्नेव दिने देशे निर्वाचनायोगस्य स्थापना जाता। श्री मोदी अवदत् यत् संविधाननिर्मातृभिः संविधाने निर्वाचनायोगाय अथ च लोकतन्त्रे जन- सहभागितायै च बृहत्-स्थानं प्रदत्तम्। अपि च निर्वाचनायोगस्य भूमिकां योगदानं च प्रशंसनीये।

उत्तरप्रदेशस्य प्रयागराजनगरे प्रवर्तितस्य कुम्भमेलकस्य विषये प्रधानमन्त्री प्रोक्तवान् यत् अयं समानतायाः सौहार्दस्य च असाधारणः संगमः अस्ति। सः अवदत् यत् कुम्भः विविधतायां एकतायाः उत्सवः अस्ति। अस्मिन् समये संगमे विशालः जनसमूहः दृश्यते। श्री मोदिना उक्तं यत् कुम्भकाले धनिकाः निर्धनाः च मिलित्वा संगमे स्नानं कुर्वन्ति । एषः एकतायाः महाकुम्भः अस्ति। सः प्रोक्तवान् यत् यथा प्रयागराजे , उज्जैने , नासिके हरिद्वारे च कुंभस्य आयोजनं भवति , तथैव गोदावरी, कृष्णा, नर्मदा कावेरी नदीनाम् तटे पुष्करम् इत्यस्य आयोजनं भवति ।

प्रधानमन्त्रिणा उक्तं यत् अयोध्यायां रामलला इत्यस्य प्राण प्रतिष्ठायाः एकवर्षं पूर्णं जातमस्ति। तथा च पौषशुक्लद्वादश्यां तिथौ लक्षशः रामभक्ताः रामलला इत्यस्य दर्शनं कृत्वा तस्य आशीर्वादं गृहीतवन्तः। सः अवदत् यत् विकासस्य पथे गच्छद्भिः अस्माभिः स्वस्य रिक्थस्य संरक्षणं कर्तव्यम् । तस्मात् प्रेरणाम् आदाय अग्रे गन्तव्यम्। प्रधानमन्त्री अन्यैः जीवैः सह मनुष्यस्य सम्बन्धस्य विषये अवदत् यत् भारतीयसंस्कृतिः रिक्थः च अस्मान् परितः पशु-पक्षिभिः सह प्रेम्णा जीवितुं शिक्षयतः। सः असम-स्य नौगांव-नगरस्य उदाहरणम् उद्धृतवान् यत् ग्राम्यजनाः गजानां भोजनार्थं नेपियर-तृणं रोपितवन्तः । श्री मोदी इत्यनेन छत्तीसगढे गुरुघासीदास तमोर पिंगला तथा मध्यप्रदेशे रतापानी बाघ अभयारण्ययोः स्थापनामालक्ष्य प्रसन्नता प्रकटिता। स्टार्टअप इण्डिया कार्यक्रमस्य नववर्षपूर्तेः अनन्तरं प्रधानमन्त्रिणा उक्तं यत् एषः

कार्यक्रमः केवलं बृहन्नगरेषु एव नास्ति तथा च अर्धाधिकाः स्टार्टअप द्वितीयस्तरस्य तृतीयस्य च नगरेभ्यः कार्यं कुर्वन्ति। सः अवदत् यत् अम्बाला, हिसार, काङ्गरा, चेङ्गलपट्टु, बिलासपुर, ग्वालियर, वाशिम इत्यादिषु देशेषु बहवः स्टार्टअप-संस्थाः कार्यं कुर्वन्ति तथा च गतवर्षे नागालैण्ड्-देशे स्टार्टअप-पञ्जीकरणे द्विशताधिका वृद्धिः अभवत्। सः स्वामी विवेकानन्दस्य चर्चां कृतवान्, यः अवदत् यत् यस्य मानवस्य स्वविचाराणां प्रति उत्साहः भवति सः एव स्वलक्ष्यं प्राप्तुं समर्थः भवति। श्री मोदी इत्यनेन उक्तं यत् कोऽपि विचारं सफलं कर्तुं उत्साहः सर्वाधिकः महत्त्वपूर्णः भवति । सः अवदत् यत् समर्पणं, उत्साहः च निश्चितरूपेण नवीनतायाः, सृजनशीलतायाः, सफलतायाः च मार्गं प्रशस्तं करोति। नेताजीसुभाषचन्द्रबोसस्य योगदानं स्मरता प्रधानमन्त्रिणा उक्तं यत् नेताजी इत्यस्य जन्मदिवसः जनवरी मासस्य त्रयोविंशतिः दिनाङ्के शौर्यदिवसत्वेन आचरिष्यते। श्री मोदी इत्यनेन उक्तं यत् एकः कुशलः प्रशासकः इति नाम्ना नेताजी अनेकानि कार्याणि अकरोत्, जनकल्याणार्थं तस्य प्रयत्नाः अद्यापि स्मर्यन्ते। श्री मोदी यूनां आह्वानं कृतवान् यत् ते नेताजेः विषये यथाशक्ति पठन्तु, तस्य जीवनात् निरन्तरं प्रेरणां स्वीकुर्वन्तु इति। प्रधानमन्त्री अरुणाचलप्रदेशस्य दीपकनबमस्य विषये चर्चां कृतवान् यः सेवायाः अद्वितीयम् उदाहरणं स्थापितवान्। दीपकमहोदयः एकं वासगृहं चालयति यत्र शारीरिकमानसिकदिव्याङ्गान् अतिरिच्य वृद्धानां मादकद्रव्यव्यसनिनः च परिचर्या क्रियते।

## गृहमन्त्री आन्ध्रप्रदेशे

आन्ध्र-प्रदेशे केन्द्रीय गृह-सहकारिता-मन्त्री अमितशाहः अद्य विजयवाडायां एनडीआरएफ इति राष्ट्रिय-आपत्-मोचनबलस्य विंशे स्थापना-दिवस-समारोहे भागम् अभजत्। अत्रावसरे गृह-मन्त्रिणा कृष्णा विले इत्यस्य कोंडापाउलुरू क्षेत्रे राष्ट्रियापत्-प्रबन्धन-संस्थानस्य -एनआईडीएम इत्यस्य दक्षिण-परिसरस्य उद्घाटनं कृतम्। तेन आभासीय-माध्यमेन विजयवाड़ायां एनडीआरएफ इत्यस्य दशम-बटालियन इत्येतत् , बिहारस्य सुपोल-क्षेत्रे एनडीआरएफ इत्यस्य क्षेत्रीय-मोचन-केन्द्रं तिरूपतौ क्षेत्रीयापराध-विज्ञान-प्रयोगशालायाः च भवनस्य अपि उद्घाटनं कृतम्। श्रीशाहेन अन्तर्जालीय पटलमाध्यमेन गोरखपुरे एनडीआरएफ इत्यस्य क्षेत्रीय-मोचन-केन्द्रस्य अपि शिलान्यासो विहितः।

गजायुद्धविरामः

इजरायल-फिलीस्तीन-देशयोः सशस्त्रसमूहस्य हमासस्य च मध्ये युद्धविरामचर्चायाः प्रथमचरणस्य आरम्भः निर्धारितसमयात् त्रिहोरायाः विलम्बेन जातः। गजा-क्षेत्रस्य इतिहासे एकस्य घातक-सङ्घर्षस्य समापनदिशि एतत् एकं प्रमुखं सोपानमिति अस्ति। मध्यस्थः कतार्-देशः युद्धविरामस्य आरम्भस्य पुष्टिं कृत्वा अवदत् यत् अद्य मुक्ताः प्रथमेषु बन्धकेषु केचन एव विदेशीय-नागरिकतां धारयन्ति इति। इजरायलदेशस्य प्रधानमन्त्रिणा सामाजिकान्तर्जालीय सन्देशे उल्लिखितं यत् तेषां बन्धकानां सूची प्राप्ता अस्ति ये बन्धकाः अद्य मुक्ताः भवितुम् अर्हन्ति। सः अवदत्, सुरक्षाप्रतिष्ठानम् अधुना विवरणं परीक्षते।

महाकुम्भ-अग्निकाण्डम्-

प्रयागराजे महाकुम्भमेलापके सेक्टर् ऊनविंशतिः इत्यत्र अद्य अग्निकाण्डम् दुर्घटितम्। येन क्षेत्रात् धूमस्य विशालाः समूहाः दृष्टाः। अस्मिन् अग्नि कांडे एकः जनः व्रणितः यस्मै उपचाराय चिकित्सालयं प्रेषितं वर्तते। अग्निकाण्डस्य एकः दृश्याङ्कनम् 'महाकुम्भपञ्चविंशत्यधिक द्विसहस्रम्' इत्यस्य सामाजिकान्तर्जालीयपटले प्रसारितम्। प्रशासनं तत्क्षणम् एव साहाय्योद्धार-कार्यक्रमं सुनिश्चितं कुर्वदस्ति। अस्थायीनिवासस्थले शयनशिबिरे इत्यत्र भोजनं निर्माणावधौ अग्निः प्रज्वलितः इति कथ्यते। परञ्च आधिकारिकरूपेण पुष्टिः न जाता।सम्प्रति अग्निः नियन्त्रणे अस्ति। अधुना, सर्वं पूर्ववत् सामान्यम् अस्ति।

खो खो

भारतीयपुरुष-महिला-दले अद्य खो खो विश्वचषकस्पर्धायाः निर्णायकद्वन्द्वे नवदिल्ल्याः इन्दिरागान्धी -आन्तरिक--क्रीडाङ्गणे नेपालदलं सम्मुखीकरिष्यतः। भारतीयमहिलादलस्य क्रीडा षड् वादने समारब्धम्, तदनन्तरं पुरुषाणां अन्तिमक्रीडा पादोनाष्ट वादने भविष्यति।

क्रिकेट्

अण्डर-19 इति महिलानां विंशतिः प्रति विंशतिः क्रिकेट्-क्रीडायां भारतेन अद्य मलेशियादेशस्य कुआलालम्पुरे वेस्ट्-इण्डीज-दलं नव-स्तोभैः पराजितम्।